
# द्वितीयः पाठः । अव्ययमाला । (कण्ठस्थीकरणार्थम्)

भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती ।
तस्यां हि काव्यं मधुरं तस्मादपि सुभाषितम् ।।

सुभाषितं नाम शोभनं भाषितम् । संस्कृतसाहित्ये विपुलानि सुभाषितानि सन्ति । अल्पाक्षरत्वं सुभाषितानां वैशिष्ट्यम् । मधुराणि गेयानि अर्थपूर्णानि एतानि सुभाषितानि । सुभाषितानां पठनेन वाणी सुसंस्कृता निर्दोषा च भवति । वक्तृत्वकलायां निपुणतासम्पादनार्थम् उत्कृष्ट-निबन्धलेखनार्थं च तानि अतीव उपयुक्तानि । अतः इयं सुभाषितानां माला छात्रैः अवश्यं कण्ठे धारणीया ।



**श्रोतुं कर्णौ, वक्तुमास्यं सुहास्यं**
**घ्रातुं घ्राणं पादयुग्मं विहर्तुम् ।**
**द्रष्टुं नेत्रे हस्तयुग्मं च दातुं**
**ध्यातुं चित्तं येन सृष्टं स पातु ।।१।।**

[येन **श्रोतुं** कर्णौ, **वक्तुं** सुहास्यम् आस्यं, **घ्रातुं** घ्राणं, **विहर्तुं** पादयुग्मं, **द्रष्टुं** नेत्रे, **दातुं** हस्तयुग्मं **ध्यातुं** च चित्तं सृष्टं सः (ईश्वरः) पातु ।]

**गुणाः कुर्वन्ति दूतत्वं दूरेऽपि वसतां सताम् ।**
**केतकीगन्धमाघ्राय स्वयमायान्ति षट्पदाः ।।२।।**

[दूरे वसताम् अपि सतां, गुणाः दूतत्वं कुर्वन्ति । (यथा) षट्पदाः केतकीगन्धम् **आघ्राय** (मधुपानाय) स्वयम् आयान्ति ।]

**भुक्त्वा तृणानि शुष्काणि पीत्वा तोयं जलाशयात् ।**
**दुग्धं यच्छन्ति लोकेभ्यो धेनवो लोकमातरः ।।३।।**

[धेनवः शुष्काणि तृणानि **भुक्त्वा** जलाशयात् तोयं **पीत्वा** लोकेभ्यः दुग्धं यच्छन्ति । (ताः) लोकमातरः (खलु) ।]

**यस्य षष्ठी चतुर्थी च विहस्य च विहाय च ।**
**अहं कथं द्वितीया स्यात्, द्वितीया स्यामहं कथम् ।।४।।**

[यस्य (कृते) **विहस्य** (इति) षष्ठी, **विहाय** (इति) चतुर्थी, अहं कथं च (इति) द्वितीया स्यात् (तस्य) अहं द्वितीया (पत्नी) कथं स्याम् ?]

**स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः ।**
**इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ।।५।।**

[स्थानभ्रष्टाः दन्ताः, केशाः, नखाः नराः च न शोभन्ते इति **विज्ञाय** मतिमान् (नरः) स्वस्थानं न परित्यजेत् ।]

## भाषाभ्यासः



**श्लोकः १-**

**१. एकवाक्येन उत्तरत ।**

अ) ईश्वरेण श्रोतुं किं दत्तम् ?
आ) आस्यं कीदृशम् ?
इ) ईश्वरेण विहर्तुं किं दत्तम् ?

२. तालिकां पूरयत।

| किं दत्तम् | किं कर्तुम्? | किमर्थम् ? |
|---|---|---|
| कर्णौ दत्तौ | श्रोतुम् | श्रवणार्थम्/श्रवणाय |
| आस्यं दत्तम् | वक्तुम् | वचनार्थम्/वचनाय |
| घ्राणं दत्तम् | ________ | घ्राणार्थम्/________ |
| पादयुग्मं दत्तम् | ________ | ________/विहाराय |
| नेत्रे दत्ते | द्रष्टुम् | ________/दर्शनाय |

३. मेलनं कुरुत।

| अ | आ |
|---|---|
| कर्ण: | कर: |
| आस्यम् | रक्षतु |
| घ्राणम् | लोचनम् |
| पाद: | श्रोत्रम् |
| नेत्रम् | तुण्डम् |
| हस्त: | नासिका |
| पातु | चरण: |

श्लोक: २ –

१. एकवाक्येन उत्तरत।

अ) के दूतत्वं कुर्वन्ति ?
आ) के केतकीम् आजिघ्रन्ति ?

२. सत्यं वा असत्यं लिखत।

अ) सज्जना: दूतत्वं कुर्वन्ति।
आ) षट्पदा: स्वयम् आयान्ति।
इ) सज्जना: केतकीगन्धम् आजिघ्रन्ति।

३. समानार्थकशब्दं चिनुत लिखत च।

सज्जना:, भ्रमरा:, आगच्छन्ति।

४. विरुद्धार्थकशब्दं लिखत। गुणा:, दूरे, आयान्ति।

श्लोक: ३ –

१. एकवाक्येन उत्तरत।

अ) धेनव: किं भुक्त्वा दुग्धं यच्छन्ति ?
आ) धेनव: जलाशयात् किं पिबन्ति ?
इ) लोकमातर: का: ?

२. श्लोकात् त्वान्त–अव्यये चित्वा लिखत।

३. वाक्यं पठित्वा कर्ता, कर्म क्रियापदं च अन्विष्यत लिखत च। दुग्धं यच्छन्ति धेनव:।

४. एकवचने परिवर्तयत।

लोकमातर: धेनव: शुष्काणि तृणानि खादन्ति।

श्लोक: ४ –

१. श्लोकात् ल्यबन्त–अव्ययानि चिनुत।

२. योग्यं रूपं चिनुत।

अ) षष्ठी– विहस्य/देवस्य ।
आ) चतुर्थी– विहाय/गेहाय ।
इ) प्रथमा– अहम्/कथम् ।

श्लोक: ५ –

१. एकवाक्येन उत्तरत।

अ) स्थानभ्रष्टा: के के न शोभन्ते ?
आ) किं विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ?


२. समानार्थकशब्दै: वाक्यं पुनर्लिखत।

स्थानभ्रष्टा: दन्ता: केशा: नखा: नरा: न शोभन्ते।

३. श्लोकात् प्रथमाविभक्ते: रूपाणि चित्वा लिखत।

CFBUB5

# वर्णानां साहचर्यम्।





अस्माकं भिन्नानि उच्चारणस्थानानि यूयं जानीथ। वयं सर्वे सहैव तिष्ठामः। अस्माकं परस्परसाहचर्यं रोचकम्। यदा अस्मासु द्वयोः अतीव सन्निकर्षः भवति तदा यद् ध्वनिपरिवर्तनं भवति सः एव **सन्धिः**।




आवयोः संयोगेन आकारः भवति। यथा–
न + अस्ति = नास्ति।




आवयोः सन्निकर्षः ईकारे परिणमते।
यथा– रवि + इन्द्रः = रवीन्द्रः।




आवयोः अपि ऊकारः भवति।
यथा–भानु+उदयः = भानूदयः।




आवयोः संयोगेन ॠकारः भवति।
यथा– मातृ+ऋणम् = मातॄणम्।

(अयं समानानां वर्णानां दीर्घरूपः सन्धिः। अतः सः **सवर्णदीर्घसन्धिः** इति उच्यते।)




यदि आवयोः अतिशयितः सन्निधिः तर्हि आवयोः स्थाने एकारः उपतिष्ठति। यथा गण+ईशः इत्यस्य उच्चारणं गणेशः।




आवयोः सन्निकर्षस्य परिणामरूपेण द्वयोरपि स्थाने 'ओकारः' आयाति।
यथा– लम्ब+उदरः इति लम्बोदरः।




आवयोः संयोगेन ऐ इति सन्धिरूपः आदेशः भवति।
यथा– सदा + एव इति सदैव।




आवयोः संयोगेन औ इति सन्धिरूपः आदेशः भवति।
यथा– गङ्गा+ओघः इति गङ्गौघः।




यदा मम संयोगः स्वरेण भवति (इ/ई वर्जयित्वा) तदा मम परिवर्तनं 'य्' इति वर्णे भवति।
यथा– करोमि + अहम् इति करोम्यहम्।




स्वरेण सह (उ/ऊ वर्जयित्वा) संयोगेन मम स्थाने 'व्' इति वर्णः आयाति।
यथा– खलु + एतत् इति खल्वेतत्।

एवम् अस्माकं मिथः प्रभावः दृश्यते। यथा स्वरसन्धिः तथैव विसर्गसन्धिः व्यञ्जनसन्धिः च अपि भवतः। सन्धिरूपेण यद् ध्वनिपरिवर्तनम् अस्मासु भवति तद्विषयकाः नियमाः वर्तन्ते। यदि तद् ध्वनिपरिवर्तनं सुष्ठु न अवगतं, सन्धिनियमाः न पठिताः तर्हि अर्थावबोधनं न भवति।